पुत्त्रेभ्यो दत्तवान् । तेषां नामानि यथा । वसुः १ वसुदानः २ दृढरुचिः ३ नाभिगुप्तः ४ स्तुत्यव्रतः ५ विप्रनामा ६ देवनामा ७ । एषां वर्षेषु सप्त सीमागिरयः । यथा । बभ्रुः १ चतुःशृङ्गः २ कपिलः ३ चित्रकूटः ४ देवानीकः ५ ऊर्द्ध्वरोमा ६ द्रविणः ७ । सप्त नद्यश्च यथा । रसकुल्या १ मित्रविन्दा २ श्रुतविन्दा ३ देवगर्भा ४ घृतच्युता ५ मधुः ६ माला ७ । तत्र स्थिताः कुशलकोविदाभियुक्तकुलकसंज्ञाः क्रमेण ब्राह्मणक्षत्त्रियवैश्यशूद्राः भगवन्तमग्निरूपिणं आसां नदीनां पयोभिर्यजन्ते । इति श्रीभागवतम् । (विष्णुपुराणे तु एतद्द्वीपाधिपतेस्तत्पुत्त्राणां गिरीणां नदीनाञ्च नामान्तराणि दृश्यन्ते । यथा २ । ४ । ३६—४४ ।

"ज्योतिष्मतः कुशद्वीपे सप्त पुत्त्राः शृणुष्व तान् ।
उद्भिदो वेणुमांश्चैव वैरथो लम्बनो धृतिः ॥
प्रभाकरोऽथ कपिलस्तन्नामा वर्षपद्धतिः ।
तस्मिन् वसन्ति मनुजाः सह दैतेयदानवैः ॥
तथैव देवगन्धर्व्वयक्षकिम्पुरुषादयः ।
वर्णास्तत्रापि चत्वारो निजानुष्ठानतत्पराः ॥
दमिनः शुष्मिणः स्नेहा मन्देहाश्च महामुने ! ।
ब्राह्मणाः क्षत्त्रिया वैश्याः शूद्राश्चानुक्रमोदिताः ॥
यथोक्तकर्म्मकर्तृत्वात् स्वाधिकारक्षयाय ते ।
तत्रैव तं कुशद्वीपे ब्रह्मरूपं जनार्द्दनम् ॥
यजन्तः क्षपयन्त्युग्रमधिकारं फलप्रदम् ।
विद्रुमो हेमशैलश्च द्युतिमान् पुष्पवांस्तथा ॥
कुशेशयो हरिश्चैव सप्तमो मन्दराचलः ।
वर्षाचलास्तु तत्रैते सप्तद्वीपे महामुने ! ॥
नद्यस्तु सप्त तासान्तु शृणु नामान्यनुक्रमात् ।
धूतपापा शिवा चैव पवित्रा सम्मतिस्तथा ॥
विद्युदम्भा मही चान्या सर्व्वपापहरास्त्विमाः ।
अन्याः सहस्रशस्तत्र क्षुद्रनद्यस्तथाचलाः ॥
कुशद्वीपे कुशस्तम्बः संज्ञया तस्य तत् स्मृतः ।
तत्प्रमाणेन स द्वीपो घृतोदेन समावृतः" ॥)

कुशः, त्रि, (कु कुत्सिते कर्म्मणि शेते अवतिष्ठते । कु + शी + कः ।) पापिष्ठः ॥ (कुत्सिते मदशय्यायां शेते इति ।) मत्तः । इति मेदिनी ॥

कुशण्डिका, स्त्री, (कुशैः कण्डिका इव । कुशकण्डिका पृषोदरात् कस्य लोपः ।) सर्व्वहोमार्थाग्निसंस्कारकक्रिया । तत्र सर्व्वेषामाकृतियुक्तकर्म्मणां कुशण्डिकासंस्कृताग्निसाध्यत्वात् सैव प्रथममभिधीयते । तत्र हस्तप्रमाणं चतुरस्रं स्थण्डिलं शर्कराङ्गाराशिकेशतुषादिरहितं पूर्ब्बोत्तरप्रवणं समं वा छायामण्डपसहितं गोमयेनोपलिप्य स्नातः शुचिराचान्तः प्राङ्मुखः कुशसहितासनोपविष्टः कर्त्ता उत्तरस्यां दिशम्युत्थापार्थं कुशकुसुमसहितजलपात्रं निधाय दक्षिणं जानु भूमौ पातयित्वा उत्तराग्रकुशोपरि सव्यहस्तप्रादेशमुत्तानं वह्निस्थापनपर्य्यन्तं भूमौ निधाय दक्षिणहस्तानामिकाङ्गुष्ठगृहीतकुशमूलेन स्थण्डिलदक्षिणप्रान्ते द्वादशाङ्गुलप्रमाणां प्राङ्मुखीं रेखामुल्लिख्य रेखेयं पृथ्वीदेवताका पीतवर्णा इति ध्यायेत् । तन्मूलतः प्रभृत्येकविंशत्यङ्गुलप्रमाणां उत्तराभिमुखीं रेखामुल्लिख्य रेखेयं अग्निदेवताका लोहितवर्णा इति ध्यायेत् । ततः प्रथमरेखायाः उत्तरतः सप्ताङ्गुलान्तरितां प्रादेशप्रमाणां पूर्ब्बाभिमुखीं रेखामुल्लिख्य रेखेयं प्रजापतिदेवताका कृष्णवर्णा इति ध्यायेत् । ततः सप्ताङ्गुलान्तरितां प्रादेशप्रमाणां पूर्ब्बाभिमुखीं रेखामुल्लिख्य रेखेयं इन्द्रदेवताका नीलवर्णा इति ध्यायेत् । ततोऽपि सप्ताङ्गुलान्तरितां प्रादेशप्रमाणां पूर्ब्बाभिमुखीं रेखामुल्लिख्य रेखेयं सोमदेवताका शुक्लवर्णा इति ध्यायेत् । ततः क्रमेण दक्षिणहस्ताङ्गुष्ठानामिकाभ्यां रेखास्थलरं गृहीत्वा प्रजापतिऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता रेखास्थलरनिरसने विनियोगः । ॐ निरस्तः परावसुरित्यैशान्यां दिशि अरत्निमात्रान्तरिते देशे प्रक्षिपेत् । ततः पूर्ब्बस्थापितजलेन रेखाभ्युक्षणं कृत्वा दक्षिणदिक्स्थकांस्यपात्रस्थाग्नेर्नैव-शरावस्थाग्नेर्व्वा ज्वलदिन्धनं गृहीत्वा प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः अग्निर्देवताग्निसंस्कारे विनियोगः । ॐ क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः । अनेन दक्षिणपश्चिमकोणे प्रक्षिपेत् । ततोऽपरमग्निं गृहीत्वा प्रजापतिर्ऋषिर्बृहतीच्छन्दः प्रजापतिर्द्देवता अग्निस्थापने विनियोगः । ॐ भूर्भुवः स्वरोम् । इत्यनेनाग्निमात्माभिमुखं तृतीयरेखोपरि स्थापयेत् ततो वामहस्तमुक्तोल्याञ्जलिं बद्ध्वा पठेत् । प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवताग्निस्थापने विनियोगः । ॐ इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ॥ ततोऽग्ने ! त्वं विश्वरूपनामासि इति नाम कृत्वा ध्यात्वाऽऽवाह्य विश्वरूपनाम्ने अग्नये नमः इति पाद्यादिनाभ्यर्च्य । ॐ सर्व्वतः पाणिपादान्तः सर्व्वतोऽक्षिशिरोमुखः । विश्वरूपो महानग्निः प्रणीतः सर्व्वकर्म्मसु ॥ इति पठेत् ॥ ततः प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा ब्रह्मस्थापनं कुर्य्यात् । समाग्रपञ्चाशत्कुशपत्ररचितं दिर्द्दक्षिणावर्त्तमूर्द्धमुखं दर्भवटुं अधीतवेदं ब्राह्मणं वा छत्रमुत्तरासङ्गं वा कमण्डलुं वा ब्रह्मत्वेन परिकल्प्य धारासहितमुदकपात्रं गृहीत्वा अग्नेरुत्तरतः प्रभृति दक्षिणावर्त्तेन दक्षिणदेशं गत्वा अरत्निमात्रान्तरिते देशे पूर्ब्बाभिमुखीं वारिधारां दत्त्वा तदुपरि प्रागग्रान् कुशानास्तीर्य्य पश्चिमाभिमुखोऽनुपविश्यन्तिष्ठेत् । वामहस्तानामिकाङ्गुष्ठाभ्यामास्तीर्णकुशपत्रमेकं गृहीत्वा प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निर्देवता तृणनिरसने विनियोगः । ॐ निरस्तः परावसुरित्यनेन दक्षिणपश्चिमकोणे प्रक्षिपेत् । ततोऽप उपस्पृश्य दक्षिणपादेन सव्यपादमवष्टभ्य उत्तराभिमुखीभूय आस्तीर्णकुशानद्भिरभ्युक्ष्य प्रजापतिर्ऋषिरनुष्टुप्छन्दः अग्निर्देवता ब्रह्मोपवेशने विनियोगः । ॐ आवसोः सदने सीद इति । ब्राह्मणब्रह्मपक्षे तु ब्राह्मण एव सीदामीति ब्रूयात् । अनेन कुशोपरि पूर्ब्बोक्तं कुशब्राह्मणं ब्राह्मणब्रह्मपक्षे तु उत्तराभिमुखं स्थापयित्वा तदुपरि कुशान् दत्त्वा अद्भिरभ्यच्य कुशकुसुमैरर्च्चयेत् । ततस्तत्रैव यथा प्रत्यक्तस्तासने पूर्ब्बाभिमुख उपविष्टो भूमिजपादिकं कुर्य्यात् । यदि तु ब्रह्मत्वेनारोपितो ब्राह्मणः अयज्ञीयवाचं वदेत्तदा इमं मन्त्रं जपेत् । प्रजापतिर्ऋषिर्गायत्रीच्छन्दो विष्णुर्द्देवता अयज्ञीयवाग्वचननिमित्तजपे विनियोगः । ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांशुले । इति जपेत् । कुशादिब्रह्मपक्षे तु कर्म्मकर्तुरेव कृताकृतावेक्षणादिब्रह्मकार्य्यकर्तृत्वादयज्ञीयवाग्वचननिमित्तं स एव जपेत् । यदि प्रकृते कर्म्मणि चरुहोमोऽस्ति तदा अस्मिन्नेव समये चरुं श्रपयित्वा तदुपरि घृतं दत्त्वा अग्नेरुत्तरतः कुशोपरि संस्थाप्य भूमिजपादिकं कुर्य्यात् । दक्षिणजानु भूमौ पातयित्वा दक्षिणहस्तोपरिभावेन अधोमुखौ हस्तौ भूमौ निधाय । परमेष्ठी ऋषिरनुष्टुप्छन्दोऽग्निर्द्देवता भूमिजपे विनियोगः । ॐ इदं भूमेर्भजामह इदं भद्रं सुमङ्गलम् । परासपत्नान् बाधस्वान्येषां विन्दते धनम् । इति जप्त्वा रात्रौ चेत् कर्म्म तदा धनमितिस्थाने वसुमिति प्रयोक्तव्यम् । ततो दक्षिणहस्तेन कुशान् गृहीत्वा अग्नेरुत्तरतः प्रभृति दक्षिणावर्त्तेन ईशानादिकमनेन मन्त्रेण परिशोधयेत् । त्रयाणां मन्त्राणामृष्यादयः साधारणाः । कौत्सऋषिर्जगतीच्छन्दोऽग्निर्द्देवता एतस्य षड्हस्य षष्ठेऽहन्यग्निमारुते शस्त्रे परिसमूहने विनियोगः । ॐ इमं स्तोममर्हते जातवेदरथमिव सम्महे मा मनीषया भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयन्तव । ॐ भरामेध्मं कृणवामा हवींषि ते चितयन्तः पर्व्वणा पर्व्वणा वयम् । जीवातवे प्रतरं साधया धियोऽग्ने सख्ये मा रिषामा वयन्तव । ॐ शकेम त्वा समिधं साधया धियस्ते देवा हविरदन्त्याहुतं त्वमादित्यानावह तान् ह्युश्मस्यग्ने सख्ये मा रिषामा वयन्तव । ततस्तान् कुशान् ऐशान्यां दिशि प्रक्षिपेत् । ततोऽग्नेः पूर्ब्बतः उत्तरान्ताद्दक्षिणान्तं यावत् उपमूललूनान् एकपञ्चाशत्कुशान् अग्रेण मूलमाच्छादयन् वारत्रयमास्तरेत् । एवं दक्षिणस्यां पूर्ब्बान्तात् पश्चिमान्तं यावत् । प्रतीच्याञ्च दक्षिणादुत्तरान्तं यावत् । एवमुत्तरस्यां पश्चिमान्तात् पूर्ब्बान्तं यावत् क्रमेणास्तरेत् । ततो घृताक्तस्वस्तिकान् दशदिक्षु पूर्ब्बादिक्रमेण दद्यात् । ॐ इन्द्राय लोकपालाय स्वाहा । एवं अग्नये इत्यादि । ततः प्रादेशद्वयप्रमाणां धवखदिरपलाशोडुम्बराणामन्यतमस्य विंशतिकाष्ठिकं मध्ये घृतस्रुवं दत्त्वा प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ जुहुयात् । ततः स्वरुच्छिन्नकुशादेव समाग्रकुशपत्रद्वयं गृहीत्वा प्रजापतिर्ऋषिः पवित्रे देवते पवित्रच्छेदने विनियोगः । ॐ पवित्रे स्थो वैष्णव्यौ इति मन्त्रेण प्रादेशप्रमाणं कृत्वा कुशान्तरेण वेष्टयित्वा नखव्यतिरेकेण छित्वा प्रजापतिर्ऋषिः पवित्रे देवते पवित्रमार्ज्जने विनियोगः । ॐ विष्णोर्मनसा पूते स्थः इत्यनेनाभ्युक्ष्य ताम्रादिपात्रे पवित्रमुत्तराग्रं